# Svasti Vachanam

# સ્વસ્તિવાચનમ્

## Document Information

Text title : Svastivachanam

File name : svastivAchanam.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Kr. PK

Proofread by : Kr. PK

Latest update : November 28, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 28, 2023

*sanskritdocuments.org*

# સ્વસ્તિવાચનમ્

ૐ શ્રી ગણેશાય નમઃ ॥

આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોऽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
દેવા નો યથા સદમિદ્ વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવેદિવે ॥

દેવાનાં ભદ્રા સુમતિરૃજૂયતાં દેવાનાં રાતિરભિ નો નિ વર્તતામ્ ।
દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્રતિરન્તુ જીવસે ॥

તાન્પૂર્વયા નિવિદા હૂમહે વયં ભગં મિત્રમદિતિં દક્ષમસ્રિધમ્ ।
અર્યમણં વરુણં સોમમશ્વિના સરસ્વતી નઃ સુભગા મયસ્કરત્ ॥

તન્નો વાતો મયોભુવાતુ ભેષજં તન્માતા પૃથિવી તત્પિતા દ્યૌઃ ।
તદ્ ગ્રાવાણઃ સોમસુતો મયોભુવસ્તદશ્વિના શૃણુતં ધિષ્ણ્યા યુવમ્ ॥

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષુ જગ્મયઃ ।
અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ॥

ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

શતમિન્નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ॥

અદિતિર્દ્યૌરદિતિરન્તરિક્ષમદિતિર્માતા સ પિતા સ પુત્રઃ ।

વિશ્વે દેવા અદિતિઃ પઞ્ચ જના અદિતિર્જાતમદિતિર્જનિત્વમ્ ॥ (શુક્લ યજુર્વેદ ૨૫ । ૧૪-૨૩)

દ્યૌઃ શાન્તિરન્તરિક્ષꣳ શાન્તિઃ પૃથિવી શાન્તિરાપઃ શાન્તિરોષધયઃ શાન્તિઃ ।

વનસ્પતયઃ શાન્તિર્વિશ્વેદેવાઃ શાન્તિર્બ્રહ્મ શાન્તિઃ સર્વꣳ શાન્તિઃ શાન્તિરેવ શાન્તિઃ સા મા શાન્તિરેધિ ॥ (શુક્લ યજુર્વેદ ૩૬ । ૧૭)

યતોયતઃ સમીહસે તતો નોઽભયઙ્કુરુ ।

શન્નઃ કુરુપ્રજાભ્યોઽભયન્નઃ પશુભ્યઃ ॥ સુશાન્તિર્ભવતુ ॥ (શુક્લ યજુર્વેદ ૩૬ । ૨૨)

ગણાનાં ત્વા ગણપતિꣳ હવામહે પ્રિયાણાં ત્વા પ્રિયપતિꣳ હવામહે નિધિનાન્ત્વાનિધિપતિꣳ હવામહે વસોમમ ।

આહમજાનિગર્ભધમાત્વમજાસિગર્ભધમ્ ॥

અમ્બેઽમ્બિકેઽમ્બાલિકેનમાનયતિકશ્ચન ।

સસસ્ત્યશ્વકઃ સુભદ્રિકાઙ્કામ્પીલવાસિનીમ્ ॥

# સ્વસ્તિવાચનમ્

## નિસ્વરઃ

ॐ શ્રી ગણેશાય નમઃ ॥

આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોऽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
દેવા નો યથા સદમિદ્ વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવેદિવે ॥

દેવાનાં ભદ્રા સુમતિરૃજૂયતાં દેવાનાં રાતિરભિ નો નિ વર્તતામ્ ।
દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્રતિરન્તુ જીવસે ॥

તાન્પૂર્વયા નિવિદા હૂમહે વયં ભગં મિત્રમદિતિં દક્ષમસ્રિધમ્ ।
અર્યમણં વરુણં સોમમશ્વિના સરસ્વતી નઃ સુભગા મયસ્કરત્ ॥

તન્નો વાતો મયોભુવાતુ ભેષજં તન્માતા પૃથિવી તત્પિતા દ્યૌઃ ।
તદ્ ગ્રાવાણઃ સોમસુતો મયોભુવસ્તદશ્વિના શ‌ૃણુતં ધિષ્ણ્યા યુવમ્ ॥

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષુ જગ્મયઃ ।
અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ॥

ભદ્રં કર્ણેભિઃ શ‌ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

શતમિન્નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ॥

અદિતિર્દ્યૌરદિતિરન્તરિક્ષમદિતિર્માતા સ પિતા સ પુત્રઃ ।
વિશ્વે દેવા અદિતિઃ પઞ્ચ જના અદિતિર્જાતમદિતિર્જનિત્વમ્ ॥ (શુક્લ યજુર્વેદ ૨૫ । ૧૪-૨૩)

દ્યૌઃ શાન્તિરન્તરિક્ષꣳ શાન્તિઃ પૃથિવી શાન્તિરાપઃ શાન્તિરોષધયઃ શાન્તિઃ ।
વનસ્પતયઃ શાન્તિર્વિશ્વેદેવાઃ શાન્તિર્બ્રહ્મ શાન્તિઃ સર્વꣳ શાન્તિઃ શાન્તિરેવ શાન્તિઃ સા મા શાન્તિરેધિ ॥ (શુક્લ યજુર્વેદ ૩૬ । ૧૭)
યતોયતઃ સમીહસે તતો નોઽભયઙ્કુરુ ।
શન્નઃ કુરુપ્રજાભ્યોઽભયન્નઃ પશુભ્યઃ ॥ સુશાન્તિર્ભવતુ ॥ (શુક્લ યજુર્વેદ ૩૬ । ૨૨)
ગણાનાં ત્વા ગણપતિꣳ હવામહે પ્રિયાણાં ત્વા પ્રિયપતિꣳ હવામહે નિધિનાન્તવાનિધિપતિꣳ હવામહે વસોમમ ।
આહમજાનિગર્ભધમાત્વમજાસિગર્ભધમ્ ॥

અમ્બેઽમ્બિકેઽમ્બાલિકેનમાનયતિકશ્ચન ।
સસસ્ત્યશ્વકઃ સુભદ્રિકાઙ્કામ્પીલવાસિનીમ્ ॥

Encoded and proofread by Kr. PK

---

*Svasti Vachanam*

pdf was typeset on November 28, 2023

Please send corrections to *sanskrit@cheerful.com*